स्नेमित्यादिभिर्युक्तो भवति। विकृतिविषमसमवायस्तु विकृत्या हेतुभूतया विषमः कारणानुरूपः समवायः कार्य्यस्य कारणेऽसम्बन्धः। यथा संयोगाद्विकृताभ्यां हरिद्राचूर्णाभ्यां हेतुभूताभ्यां विषमः कारणानुरूपो लोहितो वर्णो जायते। तथा योगेन विकृताभ्यां वातश्लेष्मभ्यां हेतुभूताभ्यां विषमा कारणाननुरूपा स्वेदस्यातिप्रवृत्तिरिति सिद्धान्तः॥ * ॥

अथ वातश्लेष्मज्वरस्य चिकित्सा।

"वातश्लेष्मज्वरे देयमौषधं नवमेऽहनि।
पिप्पली पिप्पलीमूलं चव्यचित्रकनागरैः।
दीपनीयः स्मृतो वर्गो वातश्लेष्मज्वरापहः॥
कोलमात्रोपयोगित्वात् पञ्चकोलमिदं स्मृतम्।
तीक्ष्णोष्णं पाचनं श्रेष्ठं दीपनं कफवातनुत्॥
गुल्मप्लीहोदरानाहशूलघ्नं पित्तकोपनम्॥"

इति पञ्चकोलम्॥ * ॥

"किराततिक्ताब्दतवल्लिसिंहिका-
कणाकणामूलरसोनसिन्धुकैः।
शृतः कषायो विनिहन्ति सत्वरं
ज्वरं समीरात् सकफात् समुत्थितम्॥"

इति किराताद्विक्राथः॥ * ॥

"पिप्पल्यादिगणं क्राथं पिबेद्वातकफज्वरी।
नातःपरं किञ्चिदस्मिन् ज्वरे भेषजमुत्तमम्॥"

इति पिप्पल्यादिक्राथः॥ * ॥

"पिप्पलीपिप्पलीमूलचव्यचित्रकनागरः।
वचा चातिविषा जातीपाठावत्सकरेणुकम्॥
किराततिक्तको मूर्व्वा सर्षपा मरिचानि च।
कट्फलं पुष्करं भार्गी विड़ङ्गं कर्कटाख्यम्॥
अर्कमूलं बृहत्सिंही श्रेयसी संदुरालभा।
दीप्यकश्चाजमोदा च शुकनासा सहिङ्गुका॥
एतानि समभागानि गण एषोऽष्टविंशतिः।
एषां क्राथो निपीतः स्याद्वातश्लेष्मज्वरापहः॥
हन्ति वातं तथा शीतं प्रस्वेदमपि वेपथुम्।
प्रलापश्चातितन्द्राश्च रोमहर्षरुजौ तथा॥
महावातेऽपतन्त्रे च शून्यत्वे सर्व्वगात्रजे।
पिप्पल्यादिर्महाक्राथो ज्वरे सर्व्वत्र पूजितः॥"

इति बृहत्पिप्पल्यादिक्राथः॥ * ॥

"दशमूलीरसः पीतः कणाढ्यः कफवातजे।
ज्वरे विपाके निद्रायां पार्श्वरुक्श्वासकासके॥

इति दशमूलीक्राथः॥ * ॥

तत्र श्रेयसी रास्ना वातश्लेष्मज्वरहरत्वात्॥

"पिप्पलीभिः शृतं तोयमनभिष्यन्दि दीपनम्।
वातश्लेष्मज्वरं हन्ति सेवितं प्लीहनाशनम्॥"

इति पिप्पलीक्राथः॥ * ॥

"सूतकं टङ्कणं भस्म गन्धं शुद्धं समं समम्।
द्विगुणं सूतकाद्देयं जैपालं तुषवर्ज्जितम्॥
सैन्धवं मरिचं चिञ्चा त्वक चारः शर्करापि च।
प्रत्येकं सूततुल्यं स्याज्जम्बीरैर्म्मर्द्दयेद्दिनम्॥
सूर्य्यशेखरनामायं रसो गुञ्जाद्वयोन्मितः।
मरिचस्वप्रतोयेन वातश्लेष्मज्वरापहः॥"

सूर्य्यशेखरो रसो वातश्लेष्मज्वरे शीतज्वरे च॥ रसप्रदीपे।

"स्वेदोद्गमे भ्रष्टकुलत्थचूर्ण-
निपातनं शस्तमिति ब्रुवन्ति।
जीर्णं शकृद्गोलवणस्य भाजनं
संचूर्णितं स्वेदहरं सुघूलनात्॥
मरिचं पिप्पली शुण्ठी पथ्या लोध्रञ्च पौष्करम्।
भूनिम्बः कटुका कुष्ठं कर्च्चूरो लिङ्गिका शटी॥
एतानि समभागानि सूक्ष्मचूर्णानि कारयेत्।
एतदुद्धूलनं श्रेष्ठं स्रोतोवत् स्वेदनिर्गमे॥"

लिङ्गिका पञ्चगुरिया इति लोके। अत्र शटी गन्धपलाशी। इति मरिचाद्युद्धूलनम्॥ * ॥

"भूनिम्बकारवीतिक्तावचाकट्फलजं रजः।
एषामुद्धूलनं श्रेष्ठं सन्ततं स्वेदसंस्रवे॥"

इति भूनिम्बाद्युद्धूलनम्॥ * ॥

पूर्व्वोक्तो वालुकास्वेदोऽप्यत्र समुचितः॥ यत उक्तम्।

"पीनस श्वासवाधीर्य्ये जङ्घापार्श्वास्थिशूलिनि।
वातश्लेष्मज्वरे स्वेदं कारयेत् तद्विधानवित्॥ * ॥
मातुलुङ्गफलकेशरो धृतः
सिन्धुजन्ममरिचान्वितो मुखे।
हन्ति वातकफरोगमास्यगं
शोषमाशु जड़तामरोचकम्॥

इति कवलः॥"

अथान्नमाह।

"महत्या पञ्चमूल्यान्नं सम्यक् सिद्धं चिकित्सकः।
सप्तमे दिवसे दद्यात् ज्वरे वातवलासजे॥"

इति वातश्लेष्मज्वराधिकारः॥ * ॥

अथ पैत्तिकश्लेष्मज्वराधिकारः। तत्र तस्य विप्रकृष्टसन्निकृष्टकारणकथनपूर्व्विकां सम्प्राप्तिमाह।

"पित्तश्लेष्मकरैः पित्तकफवामाशयाश्रयौ।
वह्निर्निरस्य कोष्ठाग्निं रसगौ ज्वरकारिणौ॥"

पूर्व्वरूपमाह।

"प्राग्रूपे पित्तकफयोः स्यातां पित्तकफे ज्वरे॥"

अथ तस्य लक्षणमाह।

"लिप्ततिक्तास्यता तन्द्रा मोहः कासोऽरुचिस्तृषा।
मुहुर्दाहो मुहुः शीतं पित्तश्लेष्मज्वराकृतिः॥"

आस्यस्य तिक्तत्वं पित्तेन। लिप्तत्वं कफेन। तन्द्रा अर्द्धोन्मीलितनेत्रत्वम्। मोहो मूर्च्छा॥ * ॥

अथ पित्तश्लेष्मज्वरस्य चिकित्सा।

"पित्तश्लेष्मज्वरे देयमौषधं दशमेऽहनि।
गुड़ूचीनिम्बधान्याकचन्दनं कटुरोहिणी॥
गुड़ूच्यादिरयं क्राथः पाचनो दीपनः स्मृतः।
तृष्णादाहारुचिच्छर्द्दिपित्तश्लेष्मज्वरापहः॥"

इति गुड़ूच्यादिक्राथः॥ * ॥

"अमृताकटुकारिष्टपटोलं वनचन्दनम्।
नागरेन्द्रयवश्वेतदमृताष्टकमीरितम्॥
क्वथितं सकणाचूर्णं पित्तश्लेष्मज्वरापहम्।
हृल्लासारोचकच्छर्द्दितृष्णादाहनिवारणम्॥"

इति अमृताष्टकम्॥ * ॥

"कण्टकार्य्यमृता भार्गी विश्वेन्द्रयववासकम्।
भूनिम्बं चन्दनं मुस्तं पटोलं कटुरोहिणीम्॥
विपाच्य पाययेत् क्राथं पित्तश्लेष्मज्वरापहम्।
दाहतृष्णारुचिच्छर्द्दिकासशूलनिवारणम्॥"

इति कण्टकार्य्यादिक्राथः॥ * ॥

"नागरोशीरविल्वाब्दधान्यमोचरसाम्बुभिः।
शृतः क्राथो भवेद्ग्राही पित्तश्लेष्मज्वरापहः॥"

इति नागरादिक्राथः॥ * ॥

"सशर्करामक्षमात्रां कटुकामुष्णवारिणा।
पीत्वा ज्वरं जयेज्जन्तुः पित्तश्लेष्मसमुद्भवम्॥"

अत्र कटुकाया द्वादशमाषाः। शर्करायाश्चत्वारो माषाः। एवं कर्ष इति चक्रदत्तः॥ वैद्यव्यवहारे तु कटुकाशर्करयोः समभागयोरेव कर्षः। इति कटुकीकल्कः॥ * ॥

"सपत्रपुष्पवासायाः रसः क्षौद्रसितायुतः।
पित्तश्लेष्मज्वरं हन्ति सास्रपित्तं सकामलम्॥"

अत्र वासाया रसो अर्द्धपलपरिमितो देयः। मधुसितयोः प्रत्येकं टङ्कः प्रक्षेप्यः॥ * ॥

अथान्नमाह।

"कषायः परिपीतस्तु शृङ्गवेरपटोलयोः।
पित्तश्लेष्मज्वरवमीदाहकण्डूहरो भवेत्॥" * ॥

अन्यच्च।

"पटोलधान्ययोर्यूषः पित्तश्लेष्मज्वरापहः॥"

इति पित्तश्लेष्माधिकारः॥ * ॥

अथ सन्निपातज्वराधिकारः। तस्य निदानादिचिकित्सा सन्निपातज्वरशब्दे द्रष्टव्या॥ * ॥

अथागन्तुकज्वराधिकारमाह। तत्रागन्तुकज्वरस्य निदानान्याह।

"अभिघाताभिषङ्गाभ्यामभिचाराभिशापतः।
आगन्तुर्जायते दोषैर्यथास्वं तं विभावयेत्॥"

अभिघातः शस्त्रमुषलगुड़ादिभिरभिहननम्। अभिषङ्गः कामशोकभयक्रोधभूतादीनामावेशः। अभिचारः कृत्याद्युत्पादनम्। अभिशापः ब्राह्मणगुरुवृद्धसिद्धादिकृतः शापः। तं आगन्तुज्वरं यथास्वं यथादोषलक्षणं दोषैर्व्विभावयेत् विजानीयात्॥ * ॥ अपराण्यपि निदानान्याह।

"ये भूतविषवाय्वग्निक्षतभङ्गादिसम्भवाः।
रागद्वेषभयाद्यैश्च ते स्युरागन्तवो गदाः॥"

भयाद्यैरित्याद्यशब्देन भूतविषवाय्वग्निक्षतभङ्गादयः संगृह्यन्ते। तेन रागादयोभङ्गाद्यन्ता हेतवोऽप्यागन्तुसंज्ञाः स्युः। कार्य्यकारणयोरभेदोपचारात्। एतेन आगन्तुजः स्मृत इत्यत्राप्यागन्तुशब्दो हेतुवाची आगन्तुर्ज्जायते दोषैरित्यत्र व्याधिवाची अभिघाताभिषङ्गाभ्यामित्यादि श्लोके दोषैर्यथास्वं तं विभावयेदितिवचनेनैव प्रतीयते। अभिघातादीनां विप्रकृष्टकारणत्वं मिथ्याहारविहाराणामिव दोषाणां सन्निकृष्टकारणत्वम्। तथा सति दह्यमानसंक्रुद्धरुद्रेत्यादि श्लोके आगन्तुज्वरस्याष्टमत्वविघातो दोषजेष्वेव प्रवेशात्। उच्यते। आगन्तुज्वरस्य दोषा आरम्भका न किन्तु पश्चादनुबन्धिनः॥ * ॥ तथा चागन्तुज्वरस्य सम्प्राप्तिमाह चरकः।

आगन्तुर्हि व्यथापूर्व्वो जायते पश्चान्निजैर्दोषैरनुबध्यत इति॥ * ॥